आदित्य हृदयं

आदित्य हृदयं

ततो युद्धपरिश्रांतं समरे चिंतया स्थितं |
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितं || 1 ||

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणं |
उपागम्याब्रवीद्राममगस्त्यो भगवानृषिः || 2 ||

राम राम महाबाहो शृणु गुह्यं सनातनं |
येन सर्वानरीन् वत्स समरे विजयिष्यसि || 3 ||

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनं |
जयावहं जपेन्नित्यमक्षय्यं परमं शिवं || 4 ||

सर्वमंगळमांगळ्यं सर्वपापप्रणाशनं |
चिंताशोकप्रशमनमायुर्वर्धनमुत्तमं || 5 ||

रश्मिमंतं समुद्यंतं देवासुरनमस्कृतं |
पूजयस्व विवस्वंतं भास्करं भुवनेश्वरं || 6 ||

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः |
एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः || 7 ||

एष ब्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः |
महेंद्रो धनदः कालो यमः सोमो ह्यपां पतिः || 8 ||

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः |
वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः || 9 ||

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् |
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः || 10 ||

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् |
तिमिरोन्मथनः शंभुस्त्वष्टा मार्तांड अंशुमान् || 11 ||

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः |
अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः || 12 ||

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः |
घनवृष्टिरपां मित्रो विंध्यवीथीप्लवंगमः || 13 ||

आतपी मंडली मृत्युः पिंगळः सर्वतापनः |
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः || 14 ||

नक्षत्रग्रहताराणामधिपो विश्वभावनः |
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते || 15 ||

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः | [पश्चिमे गिरये]
ज्योतिर्गणानां पतये दिनाधिपतये नमः || 16 ||

जयाय जयभद्राय हर्यश्वाय नमो नमः |
नमो नमः सहस्रांशो आदित्याय नमो नमः || 17 ||

नम उग्राय वीराय सारंगाय नमो नमः |
नमः पद्मप्रबोधाय मार्तांडाय नमो नमः || 18 ||

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे |
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः || 19 ||

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने |
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः || 20 ||

तप्तचामीकराभाय वह्नये विश्वकर्मणे |
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे || 21 ||

नाशयत्येष वै भूतं तदेव सृजति प्रभुः |
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः || 22 ||

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः |
एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणां || 23 ||

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च |
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः || 24 ||

एनमापत्सु कृच्छ्रेषु कांतारेषु भयेषु च |
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव || 25 ||

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिं |
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि || 26 ||

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि |
एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतं || 27 ||

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा |
धारयामास सुप्रीतो राघवः प्रयतात्मवान् || 28 ||

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् |
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् || 29 ||

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् |
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् || 30 ||

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः |
निशिचरपतिसंक्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति || 31 ||

इति आदित्य हृदयं |